के ए बधांये बहु दोषवाळां कर्मों छे. कह्युं छे के—'पंचेंद्रियना वधरुप मांस, दुर्गंध, अशुचि तथा बीभत्स होइ राक्षससमा भक्षकने भीति उत्पन्न करनारुं तथा कुगतिनुं मूळ छे ?' तथा 'महामोह, कलह तथा लोकोना उपहास तेमज रोग अने भयना हेतुभूत मद्य, दुर्गतिनुं मूळ छे ते साथे शरम, शोभा तथा मति अने धर्मनो नाश करनारुं छे. वळी—'मद्य, मधु, मांस अने माखणमां चोथे समये असंख्य जंतुओ उत्पन्न थाय छे.' तथा—'पोतानो तथा परनो आ लोकमां उपघात करनारी, परभवे नरक तथा तिर्यक् गतिनी मूलभूत अने दु:ख तथा मृत्युनी हेतु तेमज वैरनी वृद्धि करनारी पापनी ऋद्धिरुप मृगया छे.

इदं श्रुत्वा संविग्नाभ्यां ताभ्यां भणितं, भगवन् ! देह्यस्माकं गृहस्थावस्थोचितं धर्मं ? यतिना तु सम्यक्त्व-मूलद्वादशव्रतरूपो धर्मस्तयोर्दत्तः, उक्तं च—सो धम्मो जत्थ दया । दसट्ठदोसा न जस्स सो देवो ॥ सो हु गुरू जो णाणी । आरंभपरिग्गहा विरओ ॥ १ ॥ श्रावकधर्मं प्रपद्य तौ दंपती तुष्टौ. यतिना तयोः पुनरेवं शिक्षा प्रदत्ता यथा-जत्थ वसेज्जा सड्ढो । जईहिं सह जत्थ होइ संजोगो ॥ जत्थ चेइयभवणं । अन्नेवि जत्थ साहम्मी ॥ १ ॥ देवगुरूण तिसंझं । करेज्ज तह परमवंदणं विहिणा ॥ तह पुप्फवत्थमाईहिं । पूयणं सव्वकालंपि ॥ २ ॥ अन्यच्च-अपुव्वनाणगहणं । पच्चक्खाणं सुधम्मसवणं च ॥ कुज्जा सह जह सत्ति । तवसज्झायाइजोगं वा ॥१॥ अन्यच्च-भोअणसमए सयणे । विबोहणे पवसणे भए वसणे ॥ पंचनमोक्कारं खलु । समरेज्जा सव्वकज्जेसु ॥ १ ॥ एवं तयोः शिक्षां दत्वा साधुरन्यत्र विजहार. ॥

अर्थः—आ वचनो सांभळी ए धणीधणीयाणी बेय उद्विग्न थइने बोल्यां के—'हे भगवन् ! अमने गृहस्थावस्थाने उचित

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





धर्मनियम आपो.' यति ए तो सम्यक्त्वना मूलभूत बार व्रतरूप धर्म तेओने उपदेश्यो. कह्युं छे के-ते धर्म कहेवाय के जेमां दया होय अने जेनामां १८ दोष न होय ते देव, तथा गुरु तो ते कहेवाय के जे ज्ञानी होय अने आरंभ तथा परिग्रहथी विरत होय॥१॥ हवे ए दंपती श्रावक धर्म पामीने संतुष्ट थयां. यतिए फरी तेओने शिक्षा दीधी के-ज्यां श्राद्धो वसता होय, ज्यां यतिओनो साथे समागम थाय, ज्यां चैत्य स्थान होय अने अन्य पण ज्यां सुयोग मळे तेवा स्थाने जवुं. ।१॥ देव गुरुनुं त्रिसंध्य=सवारे, बपोरे तथा सांजे-विधिपूर्वक वंदन करवुं तथा पुष्प वस्त्रादिकथी सर्वकाळ पूजन करवुं. २ ॥ वळी-यथाशक्ति अपूर्व ज्ञाननुं ग्रहण करवुं, प्रत्याख्यान लेवुं, सारा धर्मनुं श्रवण करवुं तथा तपःस्वाध्याय अने योग सेववां ॥३॥ तेमज-भोजन टाणे, सुती वखते, जागीये त्यारे, घरथी बहार जती वेळाये तथा गाम जतां, सर्व कार्यमां पंच नमस्कारनुं स्मरण करवुं ॥ ४ ॥ आवी रीते तेओने शिक्षा आपीने साधु अन्यत्र विहार करी गया. आ बेय दंपति पोताने घरे गयां अने साधुना उपदेश प्रमाणे धर्मनुं अनुष्ठान करवा लाग्यां.

तौ दंपती स्वगृहे गतौ साधूपदिष्टं धर्मानुष्ठानं कुरुतः. कालक्रमेण ताभ्यां यतिधर्मः प्रतिपन्नः. कालं कृत्वा धनः सौधर्मदेवलोके देवत्वेनोत्पन्नः सा स्त्री तु तस्यैव मित्रदेवत्वेनोत्पन्ना. तत्र सुरसुखमनुभूय धनदेवजीवो वैताढ्ये सूरतेजोराज्ञः पुत्रश्चित्रगतिनामा विद्याधरराजो जातः, धनवत्यपि कस्यचिद्राज्ञः कन्या जाता, परिणीता च चित्रगतिनैव. तत्र मुनिधर्मं कृत्वा 'माहिंदे धणो समाणिओ इयरो य तम्मित्तो जाओ, तत्तो चइऊण धणो अवराजिओ नाम राया जाओ, सा य पिईमई तस्स पत्ती. काउं समणधम्मं गयाइं' ह्यारणाच्युतकल्पे मित्र-देवौ जातौ, ततश्च्युतो धनदेवजीवः शंखराजा जातः, धनवतीजीवश्च तस्यैव कांता जाता. तत्र शंखराजा

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





प्रतिपन्नमुनिधर्मो विंशतिस्थानकैर्निबद्धतीर्थंकरनामगोत्रः कालं कृत्वाऽपराजितविमाने समुत्पन्नः. तत्कांतापि धर्मप्रभावेण तत्रैवोत्पन्ना. धनजीवस्ततश्च्युत्वा सौर्यपुरे नगरे दशदशाराणां मध्ये ज्येष्ठस्य समुद्रविजयस्य राज्ञो भार्यायाः शिवादेव्याः कुक्षौ चतुर्दशमहास्वप्नसूचितः कार्तिककृष्णद्वादश्यां पुत्रत्वेनोत्पन्नः. उचितसमये श्रावणशुद्धपंचम्यां प्रसूता शिवादेवी, जातो दारकः, दिक्कुमारिकाविहितजातकर्मानंतरं सुरासुरैर्मेरुमस्तके जन्माभिषेके कृते सति राज्ञापि वर्धापनं कारितं. अस्मिंश्च गर्भगते कदाचित् स्वप्ने शिवादेव्याऽरिष्टरत्नमयो नेमिर्दृष्टः, अतोऽरिष्टनेमिरित्यस्य नाम कृतं. अयं कुमारोऽष्टवार्षिको जातः. ॥

अर्थः—कालक्रमें ए बेय जणाये यतिधर्म स्वीकार्यो. अंते मुआ पछी ए धन सौधर्मदेवलोकमां देव थयो अने ते स्त्री तो तेना मित्ररुप देव थइ. त्यां देवसुखोने भोगवी धनदेव जीव वैताढ्य पर्वतने विषये सूरतेजा राजानो पुत्र चित्रगति नामनो विद्याधरोनो राजा थयो धनवती पण एक राजानी कन्या अवतरी अने ए चित्रगतिनेज परणी. त्यां मुनिधर्म स्वीकारी महेन्द्र पर्वतमां धनजीव संमानित थयो, अने त्यांज इतर पण थयो त्यांथी च्यवीने धन अपराजित नामे राजा थयो अने ते प्रीतिमती तेनी पत्नी थइ. ते श्रमण धर्मने पाम्यां. आ बन्ने फरी आरण्य कल्पने विषये मित्र देव थयां त्यांथी च्युत थइने धनदेव जीव शंखराजा थइ अवतर्यो, अने धनवती जीव तेनी कांता थइ. त्यां शंखराजा मुनीधर्म स्वीकारी वीश स्थानके निबद्ध छे तीर्थंकर नाम गोत्र जेणे एवो काल करीने अपराजित विमानमां उत्पन्न थयो. तेनी स्त्री पण धर्मप्रभावथी त्यांज उत्पन्न थइ. धनजीव त्यांथी च्यवीने सौर्यपुर नगरमां दशदशारना मध्यमां ज्येष्ठ समुद्रविजय राजानी भार्या शिवादेवीनी कुखे चतुर्दश महा स्वप्नसूचित पुत्ररुपे कार्तिक कृष्णे द्वादशी

For Private and Personal Use Only

दिने प्रविष्ट थयो अने उचित समये श्रावण शुक्ल पंचमीदिने शिवादेवीने पुत्र जन्म्यो. दिशाओनी कुमारिकाओए तेनुं जातकर्म कर्यु अने सुरासुरोए मळी मेरुमस्तक उपरे जन्माभिषेक कर्यो. राजाए पण वर्धापन कराव्युं. आ ज्यारे गर्भमां हतो त्यारे क्यारेक शिवादेवीए स्वप्नमां अरिष्ट रत्नमय नेमि दीठो हतो तेथी एनुं नाम अरिष्टनेमि राख्युं. ॥

अत्रान्तरे कृष्णेन कंसे निपातिते जीवयशावचनेन यादवानामुपरि क्रुद्धो जरासिंधुराजा, तच्छंकया सर्वेऽपि यादवाः पश्चिमसमुद्रं यावद् गताः. तत्र केशवाराधितवैश्रमणेन कृता सर्वकांचनमयी द्वादशयोजनायामा नवयोजनविस्तारा द्वारिकानाम्नी नगरी. तत्र सुखेन यादवास्तिष्ठंति. क्रमेण निहते जरासिंधौ रामकेशवौ भरतार्धस्वामिनौ जातौ. ॥

अर्थः--आ कुमार ज्यारे आठ वर्षनो थयो तेवामां कृष्णे कंसने मार्यो. आ खबर जीवयशा राजाए जरासंधने कहेवराव्या तेथी राजा जरासंध यादवोना उपर कोप्यो. ए जरासंधनी शंकाथी सर्वे यादवो पश्चिम समुद्र भणी गया. त्यां केशवे आराधित एवा वैश्रमण=कुबेरे सर्व कांचनमयी बार योजन लंबाइनी तथा नव योजन विस्तारवाळी द्वारिका नामनी नगरी निर्माण करी दीधी तेमां यादवो सुखे रह्या. ज्यारे राम (बळदेव) तथा केशव (कृष्ण) ए बन्नेये जरासंधने मार्यो ते पछी ए राम तथा कृष्ण भरतार्धभागना स्वामी थया. ॥

अरिष्टनेमिर्भगवान् यौवनमनुप्राप्तः. विषयसुखपराङ्मुखोऽपि मित्रैः प्रेर्यमाणोऽसौ नानाविधक्रीडां करोति. अन्यदा समानवयस्कैरनेकराजकुमारैः सह क्रीडन् स गतो नारायणस्यायुधशालायां.तत्र दृष्टान्यनेकानि देवाधिष्ठिता-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





न्यायुधानि. तत्र दिव्यं कालावर्त्तं धनुः कौतुकेन गृह्णन् नेमिरायुधपालेन भणितः, कुमार! किमनेनाशक्यानुष्ठानेन ? न हि नारायणमंतरेणान्यः कोऽपि नर इदं धनुरारोपयितुं शक्तः. तदा ईषद्धसित्वा नेमिना तद्धनुर्लीलयैवारोपितं. आस्फालिता जीवा, तस्याः शब्देन मेदिनी कंपिता, विस्मिताः सर्वेऽप्यायुधशालिका नराः. ततस्तद्धनुर्मुक्त्वा नेमिना शंखो गृहीतः पूरितश्च. तच्छब्देन सर्वं जगद्बधिरितं, कंपिता भूमिः, गिरिशिखराणि तुत्रुटु, सा नगरी तु विशेषाच्चकंपे. ततः कृष्णश्चिंतयति, किमेष प्रलयकालकलनामापन्नोऽयं शंखनादः श्रूयते ? तावताऽयुधपालेन कृष्णस्य यथार्थो व्यतिकरः कथितः. ततो नेमिकुमारपराक्रमेण विस्मितो हरिर्बलदेवंप्रत्येवं बभाण. यस्य नेमिकुमारस्यैतादृशं सामर्थ्यमस्ति, स वर्धमानो मद्राज्यं सुखेन लास्यति. ततोऽस्य बलं परीक्ष्य राज्यरक्षणोपायं चिंतयामः. बलदेवेन भणितमलमनयाऽलीकशंकया, येनायं पूर्वं केवलिभिर्निर्दिष्टो द्वाविंशतितमो जिनः, त्वं पुनर्भरतार्धस्वामी नवमवासुदेवः. अयं च भगवानकृतराज्य एव परित्यक्तसकलसावद्ययोगः प्रव्रज्यां ग्रहीष्यति. ॥

अर्थः—अरिष्टनेमि भगवान् युवावस्थाने प्राप्त थया पण विषयसुखथी विमुख होइ मित्रोनी प्रेरणाथी अनेक प्रकारनी क्रीडाओ करे छे. एक समये पोताना समान वयवाळा अनेक राजकुमारोनी साथे रमता रमता नारायणनी आयुधशाळामां जइ चड्या. ते शाळामां अनेक देवाधिष्ठित आयुधो जोयां तेमांथी काळवर्त्त नामनुं दिव्य धनुष उपाडयुं त्यारे ए आयुधशाळाना रक्षके कह्युं–हे कुमार ! पोताथी न थइ शके तेम शा माटे करो छो? आ धनुष्नुं आरोपण नारायण सिवाय बीजो कोइ नर करी शके तेम नथी. आ वचन सांभळीने नेमिकुमारे हसीने ते धनुष् लीलामात्रथी आरोपित करी तेनी दोरी खणखणावी. ए प्रत्यंचाना आस्फालन शब्दथी

For Private and Personal Use Only

पृथ्वी कंपी, आयुधशाळामां उभेला सर्वजनो विस्मय पाम्या. ए धनुष् मूकी दइने नेमिकुमारे शंख उपाडयो अने फूंक्यो. आ शंखना नादथी बधा बहेरा थइ गया, पृथ्वी कंपी गइ, पर्वतशिखरो तूटयां अने द्वारकानगरी धुजी उठी. कृष्णे जाण्युं के-'आ ते शुं प्रलयकाळना जेवो शंखनाद संभळाय छे? तेटलीवारमां तो आयुधशाळाना रक्षके जइने सघळो वृत्तांत कह्यो. त्यारे नेमिकुमारना पराक्रमथी विस्मय पामी कृष्णे बळदेवने कह्युं के-जे नेमिकुमारनुं आवुं सामर्थ्य छे ते ज्यारे वृद्धि पामशे त्यारे सुखेथी मारुं राज्य लेशे, माटे आपणे तेनुं बळ पारखी आपणा राज्यरक्षणनो विचार करवो जोइए. बळदेवे कह्युं के-आवी खोटी शंका करवा जेवुं कंइज नथी, केमके केवलिओए पूर्वे कहेल छे जे ए नेमिकुमार बावीशमां जिन (तीर्थंकर) थशे अने तमे तो भरतार्धना स्वामी नवमा वासुदेव छो. ए नेमिकुमार भगवन् राज्य कर्या विनाज सकळ सावद्ययोगनो परित्याग करी प्रव्रज्या (दीक्षा) ग्रहण करशे.

एवं निरंतरं बलदेवेन राज्यहरणशंकया वार्यमाणोऽपि कृष्णः कदाचिदुद्याने गत्वा नेमिनंप्रत्येवमाह—कुमार! निजनिजबलपरीक्षार्थमावां बाहुयुद्धेन युध्यावः. नेमिना भणितं किमनेन बुधजननिंदनीयेन बाहुयुद्धेन? वाग्युद्धेनैवावां युध्यावः. बाहुयुद्धेन हारितस्य तव महानयशःप्राग्भारो भविष्यति. कृष्णेनोक्तं क्रीडया युध्यतोरावयोः कीदृशोऽयमयशःसमूहः? ततो भगवता नेमिना स्वबाहुः प्रसारितः, कथितं चायं मदीयो बाहुर्यदि भवता नामितस्तदा त्वया जितं, मया च हारितमिति. ततः कृष्णेन सर्वशक्त्यांदोलितोऽपि भगवद्बाहुर्न मनाक् चलितः. यथास्य भगवतो मनो निश्चलं तथा बाहुरपि निश्चल एवेति जनैः प्रशंसा कृता. ततः परमचमत्कारं गतस्य स्वराज्यहरणशंकाकुलितचेतसो नारायणस्य कियान् कालोऽतिक्रांतः. अन्यदा नेमिर्यौवनं प्राप्तो विषय-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सुखनिःपिपासोऽपि समुद्रविजयादिना विवाहार्थं भृशमुक्तोऽपि न विवाहमंगीकुरुते. ततः समुद्रविजयादिभिः केशवस्यैवमुक्तं, केशव ! तथा कुरु यथा नेमिर्विवाहमंगीकुरुते. कृष्णेनाऽपि रुक्मिणीप्रमुखाः स्वभार्याः प्रेरिताः, ताभिर्जलकेलिकरणपूर्वकमेवं श्रीनेमिनाथस्योक्तं, स्वामिन् ! लोकोत्तरं तव रूपं, निरुपमाः सौभाग्यादयोऽनंतास्त्वयि गुणाः, निरामयस्तव देहः, सुरसुंदरीणामप्युन्मादजनकं तव तारुण्यं. ततोऽनुरूपदारसंग्रहेण सफलं कुरु दुर्लभं मनुष्यत्वं. ॥

अर्थः—आवी रीते बळदेव हमेशां राज्यहरणनी शंकानुं निवारण करता तो पण कृष्ण एक वख्ते उद्यानमां जइ नेमिकुमारने मळीने कहेवा लाग्या के—'हे कुमार ! पोतपोताना बळनी परीक्षा माटे आपणे बेय बाहुयुद्ध करीयें' नेमि बोल्या के—'समजु माणस निंदा करे एवा बाहुयुद्धथी शुं करवानुं हतुं ? आपणे वाणीथी युद्ध करीये. बाहुयुद्धमां तमे हारशो तो तमारो म्हारो अपयश थशे.' कृष्णे कह्युं —'क्रीडायुद्ध करतां आपणा बन्नेनुं अपयश केम थाय ?' त्यारे नेमिभगवाने पोतानो बाहु लांबो कर्यो अने कह्युं के—'जो तमे आ मारो बाहु नमावो तो तमे जीत्या अने हुं हार्यो.' पछी कृष्णे पोतानी सर्वशक्ति वापरी पण भगवान्नो बाहु जराय नम्यो नहिं अने भगवान्ना मन जेवो तेनो बाहु पण निश्चल जोइ जनोए तेनी प्रशंसा करी. आवो परम चमत्कार पामी पोताना राज्यहरणनी शंकामां कृष्णनो केटलोक काळ वीत्यो. नेमिकुमार युवावस्थामां आव्या, पोते विषयसुखनी लालसा रहित छे छतां समुद्रविजय जेवा राजाओ विवाह माटे घणुं कहे छे तो पण विवाह करवानो अंगीकार करता नथी. त्यारे समुद्रविजयादिके मळी केशवने कह्युं के कोइ पण प्रकारे आ नेमिकुमार विवाह करवानुं कबूल करे तेम करावी आपो तो ठीक ते उपरथी कृष्णे केटलीएक



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





स्त्रीओने मोकली ने स्त्रीओए जळक्रीडापूर्वक नेमिने कह्युं के—'हे नेमिकुमार ! तमारुं आ अलौकिक रूप, निरुपम सौभाग्यादिक तमारा गुणो, रोगरहित तमारो देह, सुरसुंदरीने पण उन्माद करे एवुं तमारुं यौवन; आ बधी योग्यता होवाथी तमे कोइ लायक स्त्री परणी दुर्लभ मनुष्यपणानुं साफल्य संपादन करो. ॥

ततो हसित्वा नेमिनाथेन भणितं मुग्धानामशुचिस्वरूपाणां बहुदोषालयानां तुच्छसुखनिबंधनानामस्थिरसंगमानां रमणीनां संगमेन न भवति नरत्वं सफलं. अपि चैकांतशुद्धाया निष्कलंकाया निरुपमसुखायाः शाश्वतसंगमायाः सिद्धिवध्वा एव संगमेन नरत्वं सफलं भवति. यतः—माणुसत्ताइसामग्गी । तुच्छभोगाण कारणा ॥ रयणं च कोडिआइव । हारिंति अबुहा जणा ॥ १ ॥ अहं सिद्धिवधूनिमित्तमेव यतिष्ये. ॥

अर्थः—त्यारे नेमिनाथे कह्युं के—'मुग्ध, अशुचिस्वरूप, बहु दोषनां घरतुल्य, तुच्छ सुखना कारणभूत, अस्थिर समागमवाळी रमणीना संगमथी मनुष्यत्व सफळ नथी थतुं किंतु एकांत शुद्ध, निष्कलंक, निरुपम सुखरुप, शाश्वत संगम अर्पनार सिद्धिरुपी वधूना संगमथीज नरपणुं सफळ थाय छे. कह्युं पण छे के—'आ मनुष्यपणानी सामग्री तुच्छभोगने कारण वापरीने अबुधजनो रत्नने कोडीना बदलामां हारी बेसे छे.' माटे हुं तो सिद्धि वधूने माटे यत्न करीश. ॥

नेमेरयमभिप्रायस्ताभिः कृष्णाय निवेदितः. कृष्णेन च नेमिः स्वयं भणितः, ऋषभादयस्तीर्थंकरा दारसंग्रहं कृत्वा संतानपरंपरां वर्धयित्वा स्वेष्टलोकमनोरथान् पूरयित्वा पश्चिमवयसि निष्क्रांताः, शिवं प्राप्ताश्च. त्वमपि तत्तुल्यस्तत्रैव मोक्षे यास्यसीति, दशारचक्रसंतोषाय किं न पाणिग्रहणं करोषि ? इति कृष्णः प्रकामं विवाहाग्रहं

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





कृतवान्. नेमिस्तु मौनमालंब्य स्थितः. कृष्णेन चिंतितमनिषिद्धमनुमतमिति न्यायादंगीकृत एव नेमिना विवाह इति दशारचक्रायोक्तवान्. संजातहर्षेण दशारचक्रेण भणितः कृष्णस्त्वमेव नेम्यानुरूपां कन्यां गवेषयः ? ततः कृष्णेन गवेषयतोग्रसेनपुत्री राजीमती कन्या नेमितुल्यरूपाप्ता. सा पुनर्धनवतीजीवोऽपराजितविमानाच्च्युत्वा तत्रोत्पन्नास्तीति. इयमेव नेम्यनुरूपेति तदर्थं कृष्णेनोग्रसेनः प्रार्थितः. तेनापि मनोरथातीतोऽयमनुग्रह इति भणित्वा कन्या दत्ता. ॥

अर्थः—नेमिनो आ अभिप्राय ते स्त्रीओए कृष्णने जणाव्यो त्यारे कृष्ण पोते नेमि पासे जइने बोल्या के-ऋषभादिक तीर्थंकरो स्त्रीओ परणी संतान परंपरा वधारीने तेयज पोताना इष्टजनोना मनोरथ पूर्ण करीने उत्तर अवस्थामां प्रव्रजित थया अने शिव-मोक्ष पाम्या तेम तमे पण तेओनी बराबर वर्त्ती त्यांज मोक्ष जइ शकशो तो पछी आ दशारचक्रना संतोष माटे शा माटे पाणिग्रहण नथी करता ? आवी रीते विवाह माटे कृष्णे आग्रह कर्यो, ते नेमि तो मौन धारण करी सांभळी रह्या. कृष्णे विचार्युं के-निषेध न कर्यो तेथी नेमि संमत थया-आम धारीने दशारचक्रने कह्युं के नेमिए परणवानुं स्वीकार्युं माटे कन्या गोतो. दशारचक्रे कृष्णने कह्युं के तमेज नेमिने लायक कोइ कन्या शोधी लावो. कृष्णे तो उग्रसेननी पुत्री राजीमतीनुं मागुं कर्युं. उग्रसेन राजाए पोतानो मनोरथ सिद्ध थयो मानी घणी प्रसन्नताथी 'आ तो मारो अनुग्रह थयो' आम कही पोतानी राजीमती कन्या के जे धनवती जीव विमानमांथी च्यवीने अवतरेल छे ते नेमिने आपी. ॥

ततः कारितं कुलद्वयेऽपि वर्धापनं, गृहीतं विवाहलग्नं, कारितः समस्तज्ञातिवर्गस्य भोजनाच्छादनादिसत्कारः,

For Private and Personal Use Only

प्राप्ते च लग्नदिवसे दिव्यरमणीभिः स्नापितोऽलंकृतो विभूषितो मत्तवारणमारूढः, समंतान्मिलितदशारचक्रबलदेववासुदेवादियादवपरिकरितः, पृष्टौ वादितानेककोटिप्रमाणवादित्रः, शिरोधृतातपत्रश्चामरैर्वीज्यमानः, पृष्टौ गीयमानमंगलः, सर्वतो मागधैः कृतजयजयारवः, सुरनरसंघेन सर्वतो वीक्ष्यमाणः, सुरिभिर्नारीभिश्च प्रार्थ्यमानो नेमिकुमारः प्राप्तो महता विस्तरेणोग्रसेननृपद्वारपुरोरचितविवाहमंडपासन्नदेशं. राजीमत्यपि सर्वालंकारविभूषिता गवाक्षस्था नेमिं दृष्ट्वाऽऽनंदपरवशा जाता. एतदपि तदानीं न वेत्ति, काऽहं ? किमत्रास्ति ? कोऽयं कालः ? कीदृशी चेष्टेति. अत्रांतरे करुणारवं श्रुत्वा जानतापि नेमिना पृष्टः सारथिः, कोऽयं मरणभीरूणां प्राणिनामेष करुणारवः? तेन कथितं स्वामिंस्तव विवाहगौरवायानेकजनभोजनाय मेलिता अमी हरिणादयो जीवा व्यापादयिष्यंते, ते च सांप्रतमाक्रंदं कुर्वंतीति. नेमिराह सारथे ! रथमितो निवर्तय ? नाहं विवाहं करिष्ये. यत्रैतावतां प्राणिनां वधस्तेन विवाहेन मे समाप्तं, संसारपरिभ्रमणहेतुरेवायं विवाहः. नेमिवचनात्ते सर्वेऽपि प्राणिना मुक्ता गताः स्वस्थानं सुखेन.

अर्थः—बळे कुळमां वधामणां थयां; विवाहनुं लग्न निश्चित थयुं अने समस्त ज्ञातिवर्गने भोजनादि सत्कार शीरु थयो. लग्नदिवस आव्यो, दिव्यरमणीओ मळीने नेमिने नवरावी वस्त्र अलंकारादिकथी शणगार्या, मत्त हाथी उपर चडीने चारेकोर मळेला दशारचक्र, बळदेव, वासुदेव वगेरे यादवोथी परिवारित तथा पाछळ अनेक प्रकारनां वाद्य वागतां मस्तक उपर छत्र धरावी चामरोवडे व्यजन कराता वळी पाछळ मंगळगीत गवाय छे अने मागधजन जय शब्दो बोलता आवे छे वळी देव मनुष्योना टोळां सर्वत्र जुए छे सुरनारीओए प्रार्थना कराता नेमिकुमार महोटा विस्तार सहित उग्रसेन राजाना द्वार आगळ रचेला मंडप समीपे आवी

पहोंच्या. राजीमती पण सर्व आभूषणोथी शणगारेली गोखमां बेठी नेमिकुमारने जोइने आनंदमां एटली तो परवश बनी गइ के-हुं कोण छुं ? क्यां बेठी छुं ? आ कयो समय छे ? अने आ केवी चेष्टा थाय छे ? ए पण तेणीने भान न रह्युं. आ समये करुण शब्द सांभळी (जाणता हता छता पण) नेमिए सारथीने पूछयुं के-'जाणे मरणथी त्रास पामतां होय तेवा प्राणीओनो आ रुण नाद क्यां थाय छे ?' तेणे कह्युं के-'हे स्वामिन् ! आपना विवाहना उत्सव प्रसंगे अनेकजनोने माटे भोजन बनाववामां उपयोगी आ हरिण आदिक जीवो मेळा कर्या छे तेओने मारशे, ए अत्यारथीज बूमराण करी रह्यां छे.' नेमिए कह्युं के-हे सारथि ! मारो आ रथ जलदी अहींथीज पाछो वाळ; मारे विवाह करवो नथी. ज्यां आटलां बधां प्राणीओनो वध थाय ए विवाह मारे न जोइये. विवाह तो संसारपरिभ्रमणनोज हेतु छे.आ वखते नेमिना वचनथी ते तमाम प्राणीओने छोडी मूक्यां तेथी ते सघळां स्वस्थानके जतां रह्यां.

विरक्तचित्तं पश्चाद्वलमानं नेमिमालोक्याऽकांडवज्रप्रहारताडितेव विह्वला राजीमती धरणीतले निपतिता मूर्छिता, ससंभ्रमेण सखीजनेन शीतलजलसिक्ता, तालवृंतेन वीजिता लब्धचेतनैवं विललाप. अहो ! मयात्यंतदुर्लभे भुवननाथेऽनुरागं कुर्वत्याऽऽत्मा लघूकृतः, धिग् मम सुकुलोत्पत्तिं, धिग् मम रूपयौवनं च धिग् मम कलाकुशलतां, येनाहं नेमिना प्रतिपन्नापि मुक्ता. हे नाथ ! मे जीवितं निर्गच्छति, अंगानि मे त्रुटंति, हृदयं मे स्फुटति. विरहाग्निज्वालाकुलितोऽयं ममात्मा, आहारो मे क्षारसदृशः, जलचंदनचंद्रिकादयः पदार्थाश्चिताग्निसदृशाः स्वामिंस्तव विरहे मम जायंते, स्वामिन् ! मां त्वं किं त्यजसि ? किं मम विरुद्धं त्वया श्रुतं दृष्टं वा ? जन्मांतरकृतं ममाशुभकर्मैवोदितं, स्वामिन्नेकवारं ममाभिमुखं दृष्टिं देहि ! प्रेमपरायां मयि त्वं सर्वथा निरपेक्षो माभूः ! अथवा

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सिद्धिवधूत्कंठितस्य तव हृदयं सुरसुंदर्योऽपि न हरंति, मनुष्यस्त्रीणां तद्धरणे का गणना? एवं महाशोकभरार्दिता विलपंति राजीमती सखीजनेन भणिता, अलंघनीयो भवितव्यतापरिणामः, ततो धीरत्वावलंबनं कुरु? अलमत्र विलपितेन, सत्वप्रधाना राजपुत्र्यो भवंतीति भणित्वा संस्थापिता. ॥

अर्थः—विरक्तचित्त थइ पाछा वळता नेमिने जोइ राजीमती तो जाणे अकस्मात् वीजळी पडवाना आघातथी जेम तेम विह्वल थयेली पृथ्वीतल उपर मूर्छा खाइने पडी गइ, गभराइ गयेल सखीजनोए शीतळ जळ छांटी तालना पंखावडे पवन नाखतां शुद्धिमां आवी त्यारे भोंयपर पडीपडी विलाप करवा लागी. अहो! आ अतिदुर्लभ भुवननाथ जेवामां मे अनुराग करीने मारो आत्मा हलको कर्यो. मारी सारा कुळमां उत्पत्ति थइ तेने धिक्कार; मारा आ रूपने, यौवनने तथा आ मारी कळाकुशळताने पण धिक्कार छे के जे हुं नेमिनाथने पामीने त्यजाणी. हे नाथ! मारुं जीवित जाय छे; मारा अंगो त्रुटे छे; मारुं हृदय फाटे छे, मारो आ आत्मा विरहाग्निनी ज्वाळाथी आकुळ थाय छे, अने आहार खारो थयो, जळ, चंदन, चंद्रिका आदिक पदार्थो चिताना अग्नि समान थया. हे स्वामिन्! मने केम त्यजो छो? शुं आपे कंइ मारुं विरुद्ध आचरण दीठुं के सांभळ्युं? आ ते शुं मारूं जन्मान्तरमां करेलुं अशुभ कर्म उछळ्युं? हे स्वामिन्! एकवार मारे सामे दृष्टि करो. आपने विषये प्रेमपरायण थयेली आ किंकरी प्रति अनादरवाळा मा थाओ अथवा सिद्धिवधूमां उत्कंठित थयेला तमारुं सुरसुंदरीओ पण हृदय हरी न शके तो पछी मनुष्य स्त्रीनी शी गणना? आम महाशोकथी पीडाइने विलाप करती राजीमतीने तेनी सखीओए कह्युं के–'भवितव्यतानो परिणाम कोइथी ओळंगी शकातो नथी माटे धीरज धरो. हवे विलाप बन्ध करो. तमारा जेवी राजपुत्रीओ तो सत्त्वगुणवाळी होय छे.' आवां वचन कहीने जरा शांत करी. ॥



For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





द्वितीयदिनेऽनया सखीनां पुर एवमुक्तं, अद्य मयेदृशः स्वप्नो दृष्टः, यथा मद्द्वारदेशे एको दिव्यपुरुषो देवदानवपरिवृतः सिंहासनमारूढः, तस्याभ्यर्णेऽनेकजंतवः समागताः, अहमपि तत्रैव गता. स च चतुरः शारीरमानसदुःखप्रणाशकानि पादपफलानि तेभ्यो ददन्मया प्रार्थितो भगवन् ! ममाप्येतानि फलानि देहि ? तेन तानि दत्तानि. तदनंतरं प्रतिबुद्धाहं, सखीभिर्भणितं हे प्रियसखि! मुखकटुकोऽपि स्वप्नोऽयं शीघ्रं परिणामसुंदरो भविष्यति.

अर्थः—बीजे दिवसे राजीमतीए सखीओनी आगळ कह्युं के–'आज में स्वप्नमां एम दीठुं के जाणे एक दिव्य पुरुष मारा द्वारप्रदेशमां सिंहासन उपर बेठा छे अने तेने फरता देवदानवो उभा छे, आ पुरुषनी आगळ अनेक जंतुओ आव्या, हुं पण त्यांज गइ त्यारे ए चतुर पुरुषे शरीर तथा मननां दुःखोनो नाश करे तेवां वृक्षोनां फळ ए जंतुओने दीधां ते वखते में प्रार्थना करी के–'हे भगवन् ! मने पण ए फळो आपो' एटले तेणे मने पण फळो दीधां, तदनंतर तो हुं जागी गइ. आ स्वप्ननी हकीकत सांभळीने सखीओए राजीमतीने कह्युं के–' हे प्रियसखि ! आ स्वप्न उपरथी कटु जणातो होय तो पण परिणामे घणोज सुंदर नीवडशे. ॥

इतश्च नेमिनाथः समुद्रविजयशिवादेव्यादिभिर्विविधैरुपायैः पाणिग्रहणार्थं प्रार्थ्यमानोऽपि नैव तमर्थमंगीचकार. अस्मिन्नवसरे लोकांतिकास्तत्रागत्यैवमूचिरे, भगवन् ! सर्वजगज्जीवहितं त्वं तीर्थं प्रवर्तयेति भणित्वा जननीजनकादीनामंतिके गत्वैवमूचुः, भवत्कुलोत्पन्नः श्रीनेमिः प्रव्रजिषुरस्तीति को भवतां विषादः ? नेमिरपि मातृपित्रोः पुरः कृतांजलिरेवमुवाच, इच्छामि युष्मदनुज्ञातः प्रव्रजितुं. इदं च श्रुत्वा शोकसंघट्टनिरुद्धहृदया धरणीतले निपतिता चूर्णितभुजवलया शिवादेवी, मिलितं तत्र दशारचक्रं, जलाभिषेकादिना लब्धसंज्ञा सा भणितुमारब्धा,

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





वत्स ! कथमस्माकं मनोरथं मूलादुच्छिदसि ! कथं वा त्वं सत्पुरुषोऽपि प्रार्थनाभंगं करोषि ? दशारचक्रस्यापि मनःसंतापं किं करोषि ? कथं च वयमुग्रसेनराज्ञो मुखं दर्शयिष्यामः ? कथं च त्वदेकचित्ता सा वराकी राजीमती भविष्यति ? ततोऽस्मदुपरोधेन तस्याः पाणिग्रहणं कुरु ! ततः पश्चात्प्रव्रज्यां गृहीयाः ? भणितं च भगवता मातर्मनःसंतापं मा कुर्याः, सर्वभावानामनित्यत्वं भावय ! विषयाणां विपाकदारुणत्वमतृप्तिजनकत्वं चास्ति. यौवनधनादीनां चंचलत्वं, संध्यासमयाभ्रतुल्यतां च विलासानामवेहि ? अकांडप्रहारत्वं मृत्योः जन्मजरामरणरोगादिप्रचुरत्वं च संसारस्यालोचय ! ततो मातर्मामनुजानीहि भवप्रदीपनान्निर्गच्छंतं. ॥

अर्थः—अहीं नेमिनाथ, समुद्रविजय तथा शिवादेवी वगेरेये विविध उपायोवडे पाणिग्रहण माटे समजाववा मांडया पण तेओनी प्रार्थनानो अंगीकार नज कर्यो. आ अवसरे लोकांतिको त्यां आवीने बोल्या के–'हे भगवन् ! सर्व जगत्ना जनोनुं हितकर तीर्थ तमे प्रवर्त्तावो.' आम नेमिनाथने कही पछी तेनां मातापिता आदिकनी पासे जइ कह्युं के–'आपना कुळमां उत्पन्न थयेला श्रीनेमि प्रव्रज्या गृहण करवा इच्छे छे तो तेमां तमे खेद कां करो छो ! आ समये नेमि पोते पण मातापिता आगळ आवी बे हाथ जोडीने कहेवा लाग्या के–आपनी अनुज्ञा लइ प्रव्रज्या गृहण करवा इच्छुं छुं. आ सांभळी शिवादेवी शोकना आघातथी रुंधाइ गयुं छे हृदय जेनुं एवी थइने धरणीतळे पडी गइ अने तेनां हाथनां कंकण भांगी गयां. दशारचक्र भेळुं थयुं. जळ छांटीने सावध कर्या त्यारे शिवादेवी बोलवा लाग्यां के–'हे वत्स! अमारा मनोरथने मूळमांथी केम छेदो छो? तमे सत्पुरुष कहेवाओ छो अमारी प्रार्थनानो भंग केम करो छो ? आ दशारचक्रना मनने संताप शा सा सारुं करावो छो ? अमे राजा उग्रसेनने मुख केम बतावी शकशुं ? मात्र

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





तमारा एकमांज जेनुं चित्त छे एवी राजीमती केम रही शकशे ? माटे अमारी खातर तेनुं पाणिग्रहण करो अने पछीथी प्रव्रज्या गृहण करजो. आ सांभळी भगवान् नेमि बोल्या के-'हे माता ! तमे मनमां संताप मा करो. सर्व पदार्थोनी अनित्यता समजो विषयो बधा परिणामे अति दारुण छे अने सर्वथा तृप्तिजनक थताज नथी. यौवन धन आदिक सर्व चंचळ छे, आ बधा विलास संध्या समयनां वादळां जेवां क्षणिक छे; मृत्यु अकस्मात् प्रहार करनारो छे, अने आ संसार तो जन्म जरा मरण रोग आदि उपद्रवमयज समजो. माटे हे माता ! आ बळता भवमांथी नीकळी जवाने मने अनुज्ञा (रजा) आपो. ॥

अत्रांतरे दशारचक्रेण नेमिर्भणितः, कुमार ! संप्रति त्वया परित्यक्तस्य यादवलोकस्य न कश्चित् त्राणमिति ततः कंचित्कालं प्रतीक्षस्व ? तदुपरोधशीलया वाण्या भगवता संवत्सरमेकं यावत् स्थितिरंगीकृता, दत्तं च तस्मिन्नेव सांवत्सरिकं दानं. प्रतिपूर्णे च संवत्सरे मातृपित्रादीनापृच्छय श्रावणशुद्धषष्ठयां स देवमनुष्यपर्षदा परिवृतो नगर्या निर्गत्य गतः सहस्राम्रवनोद्याने, त्रीणि वर्षशतानि गृहस्थावासे स्थित्वा षष्ठभक्तेन पुरुषसहस्रेण समं तत्र निष्क्रांतस्तपःसंयमरतो विहरति. ॥

अर्थः—आ अवसरे दशारचक्रे नेमिने कह्युं के-'हे कुमार ! आ टाणे तमे आ यादव लोकोने त्यजतां एओने कोइ आश्वासन नथी तो आप केटलोक काळ खोभरो तो सारुं' आवा आग्रहथी तेओना मनःसमाधानार्थ भगवान् नेमिनाथे एक संवत्सर सुधी त्यां स्थिति करी. अने त्यांज सांवत्सरिक दान दीधुं. ज्यारे एक संवत्सर पूर्ण थयो त्यारे मातापिता वगेरेनी रजा लइ श्रावण शुक्ल-षष्ठीदिने देवमनुष्य मंडळथी परिवृत्त नेमिनाथ नगरीमांथी नीकळी सहस्राम्रवन नामना उद्यानमां गया. त्रणसे वर्ष गृहस्थावासमां

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





रही छठ्ठनी तपस्यावाळा हजार पुरुषोनी साथे नीकळेला तपःसंयममां दृढता राखी विहार करवा लाग्या. ॥

इतश्च भगवतो भ्राता रथनेमिः प्रीतिपर एकांते राजीमतीमेवमाह, सुभ्रु! मा कुरु विषादं ? सौभाग्यनिधिकः को न प्रार्थयति ? भगवान् पुनर्नेमिनाथो वीतरागत्वान्न करोति विषयानुबंधं, ततः प्रतिपद्यस्व मां ? सर्वं कालमहं त्वदाज्ञाकारी भविष्यमि. तया भणितं यद्यहं नेमिनाथेन परित्यक्ता, तथाप्यहं तं न परित्यजामि. यतोऽहं भगवत् एव शिष्यणी भविष्यामि. ततस्त्वमेनं प्रार्थनानुबंधं त्यज ? ततः स कतिचिद्दिनानि यावन्मौनेन स्थितः, अन्यस्मिन् दिने पुनरपि तेन सा प्रार्थिता. ततस्तया तत्प्रतिबोधार्थं तत्प्रत्यक्षमेव क्षीरं पीत्वा मदनफलपानेन वांत्वा, तच्च सौवर्णिककच्चोलके क्षिप्त्वा समुपनीतं रथनेमेर्भणितं चेदं पिब ? तेनोक्तं कथं वांतं पिबामि ? तया भणितं त्वं किमेतज्जानासि ? स आह बालोऽप्येतज्जानाति. साप्यत्तर्हि नेमिनाथवांतां मां कथं त्वं पातुमिच्छसि ? इदं राजीमत्या वचः श्रुत्वा स उपरतः. राजीमत्यपि दीक्षाभिमुखी तपोविधानैः शरीरं शोषयंती तिष्ठति. ॥

अर्थः—आ तरफ भगवान् नेमिना भाइ रथनेमि राजीमतीमां प्रीतिमान् बनी एकांतमां तेणीने बोल्या के–'हे शोभन भ्रकुटीवाळी ! तुं जराय खेद करयां. तारा जेवी सौभाग्यनिधिनी कोण प्रार्थना न करे ? भगवन् नेमिनाथ तो वीतराग होवाथी विषयमां न लाग्या तो पछी तुं मने पतिरुपे स्वीकार. हमेशां हुं तारो आज्ञाकारी बनीने रहीश.' आ वचन सांभळी राजीमती बोली के— जो के नेमिनाथे मने त्यजी पण में नेमिनाथने नथी त्यज्या, हुं तो ए भगवान्नी शिष्या बनीने रहीश; माटे तुं आ प्रार्थनानो आग्रह छोडी दे. ते पछी ए रथनेमि केटलाक दिवस तो मूंगे मोढे बेसी रह्या पण फरीथी एक दिवस आवीने वळी पाछो पोताने वरवानी मागणी

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



करवा लाग्या त्यारे राजीमतीए तेने प्रतिबोध आपवा माटे तेना देखतां दूध पी तेना उपर मींढण घसीने पीधुं के तरत वमन थयुं, ए वमन करेल दूध एक कचोळामां भरी रथनेमिनी पासे धरी कह्युं के–'आ पीओ.' त्यारे रथनेमि कहे 'ए वमन करेलुं कंइ पीवाय?' राजीमती कहे 'आम तमे समजो छो ?' रथनेमि कहे 'ए तो नानो बालक समजे के वमन करेलुं न पीवाय एमां शुं ? त्यारे राजीमती बोली के–'त्यारे नेमिनाथे वात करेली मने तमे केम पीवा इच्छो छो ? आवुं राजीमतीनुं वचन सांभळी ते उपराम पाम्यो. राजीमती पण दीक्षा लेवानी धारणाथी तपोविधानवडे शरीरनुं शोषण करवा लागी. ॥

अत्रांतरे चतुःपंचाशद्दिनपर्यंते भगवतः श्रीनेमिनाथस्य रैवतगिरिसहस्राम्रवने केवलज्ञानमुत्पन्नं. देवैः कृतं समवसरणं. तत्र समायातासु द्वादशपर्षत्सु देशना कृता. तां च श्रुत्वा बहवः प्राणिनः प्रव्रजिताः. केचिद् गणधरा जाताः, स्थापितं भगवता तीर्थं, राजीमत्यपि विविधकन्याभिः सह प्रव्रजिता. रथनेमिरपि संविग्नस्तदानीमेव प्रव्रजितः. राजीमती तदानीमेवमचिंतयत्, यो मया तदानीं दिव्यपुरुषस्वप्नो दृष्टः सोऽद्य सफलो जातः.

अर्थः—आ अवसरमां चोपनदिवसने अंते भगवान् नेमिनाथने रैवताचलना सहस्राम्रवनमां केवळ ज्ञान उत्पन थयुं. देवोए समवसरण कर्यं. त्यांकणे आवेली द्वादश पर्षदूने विषये देशना करी, ते सांभळीने घणा प्राणिओ प्रव्रजित थया, केटलाक गणधर थया, भगवाने तीर्थ स्थाप्युं, राजीमती पण विविध कन्याओ सहित प्रव्रजित थयां. रथनेमि पण संवेगपामी तेज वखते प्रव्रजित थयो. राजीमतीए ते समये विचार्युं के–'में ते वखते स्वप्नमां दिव्य पुरुष दीठो हतो तेनुं फळ मने आजे मळ्युं. ॥

अन्यदा राजीमती साध्वीभिः समं भगवतो वंदनार्थं रैवतगिरिं गच्छंत्यकस्मान्मेघवृष्ट्याऽभ्याहता. सर्वा



For Private and Personal Use Only

अपि साध्व्योऽन्यगुहासु निलीनाः. राजीमत्यप्येकस्यां गुहायां प्रविष्टाऽस्ति, तत्र च पूर्वं रथनेमिसाधुः प्रविष्टो परमंधकारप्रदेशे स्थितोऽयं न दृष्टस्तया. ततस्तया चीवराणि सर्वाण्यप्युत्तारितानि, एवं सा निरावरणा जाता. तस्याः शरीरशोभां दृष्ट्वा, इंद्रियाणां च दुर्दांततयाऽनादिभवाभ्यस्ततया च विषयाभिप्रायेण स परवशो जातः, तादृशो रथनेमिश्च तया दृष्टः. ततो भयभ्रांता सा सद्य आत्मानं प्रावृत्य बाहुभ्यां संगोप्यां च स्थिता. तेन भणिता हे सुतनु ! तावदनुरागवशेनाहमिदं शरीरमरतिपरिगतं धर्तुं न शक्नोमि. ततः कृत्वानुग्रहं प्रतिपद्यस्व मया समं विषयसेवनं ? पश्चात् संजातमनःसमाधी आवां निर्मलं तपः संयमं च चरिष्यावः. तयापि साहसमवलंब्य प्रगल्भवचनैः स भणितः, महाकुलप्रसूतस्य तव किमिदं युक्तं स्वयं प्रतिपन्नस्य व्रतस्य भंजनं? जीवितमपि सत्पुरुषास्त्यजंति, न पुनर्व्रतलोपं कुर्वन्ति. ततो महाभाग ! मनःसमाधिं कृत्वा चिंतय विषयविपाकदारुणत्वं, शीलखंडनस्य नरकादिकं च फलं ? न च विषयसेवनेन मनःसमाधिः, किं तु भूरितराऽरतिर्भविष्यति. विषयसेवनेन लब्धप्रसरस्य मनसः प्रकाममिच्छा वर्धते उक्तं च—

अर्थः—एक समये राजीमती साध्वीओनी साथे भगवान्ने वंदन करवा रैवतगिरिपर जइ रह्यां हतां तेटलामां अकस्मात् मेघ वृष्टि थवाथी अकळाइने ए सघळी साध्वीओ पर्वतनी गुफाओमां भराइ गयां, राजीमती पण वासे रही जतां एक गुफामां पेठां. आ गुफामां रथनेमि प्रथमथी पेठेला पण अंधकारने लीधे राजीमतीए दीठो नहिं तेथी एकांत निर्जन स्थान जाणी भींजाइ गयेलां वस्त्रो ऊतारी पोते निरावरण थतां रथनेमिए दीठां. तेणीना शरीरनी शोभा जोइ इन्द्रियोनी स्वछंदता तथा अनादिभवभां अनुभवेल

वासनाथी विषयानुभिलाषवडे परवश थयेल रथनेमि तरफ राजीमतीनी दृष्टि जतां भयभ्रांत थइ तेणी पोतानुं अंग ए भीनां वस्त्रोथी ढांकी बेय हाथवती आवृत करी बेसी गयां. त्यारे रथनेमि बोल्या के-'हे सुतनु ! आ वख्ते अनुरागना आवेशथी बेचेनीमां घेरायेला आ मारा शरीरने हुं धारी शकतो नथी माटे अनुग्रह करी मारी साथे विषयसेवन करो. पछीथी आपणे बेय मनःसमाधि थतां निर्मल तपःसंयम आचरण करीशुं. आ टाणे ते राजीमतीए साहसनुं अवलंबन करी प्रगल्भ वचनोवडे रथनेमिने फट्कार्यो के-'हे महोटा कुळमां जन्मेला तारा जेवा पुरुषने पोते स्वीकारेला व्रतने आम भांगवुं ए योग्य छे ? मनने समाहित राखीने विचारो के-विषय सेवननो विपाक (परिणाम) घणोज दारुण=भयंकर थाय छे अने शीलखंडननुं फळ नरकगतिज छे. तेम विषयसेवन करवाथी मनः-समाधि नथी थती, ए तो जेम जेम विषयोने सेवो तेम तेम अरति अधिकाधिक थवानी. विषय सेवनथी मनने मार्ग मळतां इच्छा वधे छे. कह्युं पण छे के—

भुक्ता दिव्वा भोगा। सुरेसु तह य मणुएसु ॥ न य संजाया तत्ति। अतत्ति रंकस्सवि जीअस्स ॥ १ ॥

इत्यादिवाक्यैस्तयाऽनुशासितः स संबुद्धः, सम्यगहं प्रतिबोधितस्त्वयेति भणन्नात्मानं निंदयित्वा, राजीमतीं च भृशं स्तुत्वा स गतः साधुसभामध्ये, सापि च साध्वीसभामध्ये गतेति. अरिष्टनेमिर्भगवान् मरकतसमवर्णो दशधनुरुच्छ्रितदेहः शंखलांछनस्त्रीणि वर्षशतानि गृहवासे स्थितः, चतुःपंचाशद्दिनानि छाद्मस्थ्ये स्थितः, चतुः-पंचाशद्दिनानि सप्तशतवर्षाणि केवलपर्यायेण विहृत्यानेकभव्यान् प्रतिबोध्य च सर्वं वर्षसहस्रायुः परिपाल्य रैवतगिरावाषाढशुद्धाष्टम्यां सिद्धिं गतः क्रमेण रथनेमिराजीमत्यावपि सिद्धिं जग्मतुः. इत्यरिष्टनेमि-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





चरित्रं सूत्रमध्ये लिख्यते—

अर्थः—देवयोनिमां तथा मनुष्यभवमां दिव्य भोगो भोगव्या पण तृप्ति तो नज थइ. रांक जीवने पण अतृप्तिज रहे. १ इत्यादि वाक्योवडे राजीमतीए रथनेमिने शीखामण आपतां प्रबुद्ध थइने ते बोल्या के—तमे मने सम्यक् प्रकारे प्रतिबोधित कर्यो आटलुं बोली पोतानी निंदा करतो तथा राजीमतीनी अत्यंत स्तुति करतो ते रथनेमि साधुसभामां गयो अने राजीमती पण साध्वीसभा मध्ये जइ पहोंची. अरिष्टनेमि भगवान् मरकतमणि समान देहकांतिवाळा दशधनुःप्रमाण देहनी उंचाइवाळा तथा शंखलांछन धारण करता त्रणसो वर्ष गृहवासमां स्थित थया, चोपन दिवस पर्यंत छद्मस्थ (वेष बदली छाना) रही विचर्या, चोपन दिवस युक्त सातसो वर्ष केवळ पर्यायथी विहार करी अनेक भव्य जीवोने प्रतिबोध आपीने सकळ सहस्र वर्षनुं आयुष परिपालन करी रैवतगिरिमां आषाढ मासनी शुक्ला अष्टमीदिने सिद्धि पाम्या. क्रमे करी रथनेमि तथा राजीमती पाम्यां. आ अरिष्टनेमिनुं संक्षिप्त चरित्र कह्युं. हवे तत्प्रतिपादक सूत्रो आगळ लखाय छे. ॥

मू०—सोरियपुरंमि नयरे । आसि राया महड्ढीए ॥ वसुदेवत्ति नामेणं । रायलक्खणसंजुए ॥ १ ॥

व्या०—सौर्यपुरे नाम्नि नगरे वसुदेव इति नाम्ना राजासीत्. यद्यपि सौर्यपुरे समुद्रविजयप्रमुखा दश दशार्हा भ्रातरो विद्यंते, तेषु दशसु लघुभ्राता वसुदेवोऽस्ति, तथापि वसुदेवपुत्रो विष्णुरभूत्, तेन वसुदेवस्यैव वर्णनं कृतं कीदृशो वसुदेवः ? महर्द्धिकः, छत्रचामरादिविभूतियुक्तः, पुनः कीदृशः ? राजलक्षणसंयुतः, हस्तपादयोस्तलेषु राज्ञो लक्षणानि चक्रस्वस्तिकांकुशवज्रध्वजछत्रचामरादीनि, तैः महितः, अथवौदार्यधैर्यगांभीर्यादिसहित ॥ १ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





अर्थः—सौर्यपुर नगरमां वसुदेव नामे राजा हता. यद्यपि आ सौर्यपुरमां समुद्रविजय वगेरे दश दशार्ह भाइओ हता ते दशेमां नाना भाइ वसुदेव हता तथापि वसुदेवना पुत्र विष्णु थया तेने लीधे वसुदेवनुं वर्णन कर्युं. केवा वसुदेव ? महर्धिक=छत्रचामरादि महोटी राजविभूतिथी संयुक्त, तथा राजलक्षणसंयुत; अर्थात् हस्ततलमां तथा पादतलमां चक्र, स्वस्तिक, अंकुश, वज्र, ध्वज, छत्र, चामर; इत्यादि चिन्होथी संयुत अथवा औदार्य, शौर्य, धैर्य, गांभीर्य; इत्यादि राजगुणोवडे संयुत हता. १ ॥

मू०—तस्स भज्जा दुवे आसि । रोहिणी देवई तहा ॥ तासिं दोण्हंपि दो पुत्ता । अइट्ठा रामकेसवा ॥ २ ॥

व्या०—तस्य वसुदेवस्य द्वे भार्ये आस्तां, रोहिणी तथा देवकी. यद्यपि वसुदेवस्य द्वासप्ततिसहस्रं दारा आसन्, तथाप्यत्रोभयोरेव कार्याद्रोहिणीदेवक्योरेव ग्रहणं कृतं. तयो रोहिणीदेवक्योर्द्वयोर्द्वौ पुत्रावभूतां. तौ पुत्रौ कौ ? रामकेशवौ. कीदृशौ तौ ? अभीष्टौ मातापित्रोरधिकवल्लभौ. ॥ २ ॥

अर्थः—ते वसुदेवने बे भार्याओ हती, रोहिणी तथा देवकी. जो के वसुदेवने बउंतेर हजार स्त्रीओ हती तो पण अहीं बेनुंज कार्य होवाथी रोहिणी तथा देवकीनुंज ग्रहण करेल छे. ते रोहिणी तथा देवकीने बे पुत्रो हता. ते पुत्रो कया ? राम तथा केशव. ते केवा ? माता-पिताने अभीष्ट अर्थात् अतिप्रिय हता. (रोहिणीना बळराम अने देवकीना कृष्ण). ॥ २ ॥

मू०—सोरियपुरंमि नयरे । आसि राया महड्ढिए ॥ समुद्दविजए नामं । रायलक्खणसंजुए ॥ ३ ॥

व्या०—सौर्यपुरे नगरे समुद्रविजयो राजा महर्धिक आसीत्. कीदृशः समुद्रविजयः ? राजलक्षणसंयुक्तः. अत्र पुनः सौर्यपुराभिधानं समुद्रविजयवसुदेवयोरेकत्रावस्थितिदर्शनार्थं. ॥ ३ ॥

For Private and Personal Use Only

अर्थः—सौर्यपुरनगरमां महोटी ऋद्धिवाळो समुद्रविजय नामनो राजा हतो. ते केवो? राजलक्षणो वडे संयुक्त. अहींपण सौर्यपुर नगरनुं नाम, समुद्रविजय तथा वसुदेव बन्नेनी एकत्र स्थिति दर्शाववा माटे निर्दिष्ट करेलुं छे. ॥ ३ ॥



मू०—तस्स भज्जा सिवानाम। तीय पुत्ते महायसे ॥ भयवं अरिट्ठनेमित्ति। लोगनाहे दमीसरे ॥ ४ ॥

व्या०—तस्य समुद्रविजयस्य राज्ञः शिवानाम्नी भार्यासीत्. तस्याः षिवादेव्याः पुत्रो भगवानैश्वर्यधारी अरिष्टनेमिरासीत्. चतुर्दशस्वप्नदर्शनानंतरमेकमरिष्टरत्नमयं रथचक्रं सा ददर्श, तेनारिष्टनेमिरिति नाम प्रदत्तं कथंभूतोऽरिष्टनेमिः? महायशा महाकीर्त्तिः, पुनः कीदृशोऽरिष्टनेमिः? लोकनाथश्चतुर्दशरज्जुप्रमाणलोकप्रभुः. पुनः कीदृशोऽरिष्टनेमिः? दमीश्वरः. कुमारत्वेऽपि येन कंदर्पो जितः. तस्माद्दमिनां जितेंद्रियाणामीश्वरो दमीश्वरः. ॥ ४ ॥

अर्थ—ते समुद्रविजय राजानी शिवा नामनी भार्या हती. ते शिवादेवीना पुत्र भगवान् ऐश्वर्यधारी अरिष्टनेमि हता—ए शिवादेवी ए स्वप्नमां चतुर्दश स्वप्न दीठापछी एक अरिष्टरत्नमय रथचक्र तेणीये दीठुं ते उपरथी ए पुत्रने अरिष्टनेमि एवुं नाम धराव्युं. ते अरिष्टनेमि केवा? महोटा यशवाळा तथा लोकनाथ=चतुर्दशरज्जु प्रमाण लोकना प्रभु अने दमीश्वर=कुमारपणामांज जेणे कंदर्पने जीत्यो तेथी दमी-जितेंद्रियोना इश्वर=दमीश्वर थया.॥ ४ ॥

मू०—सोरिट्ठनेमिनामो उ। लक्खणस्सरसंजुओ ॥ अट्ठसहस्सलक्खणधरो। गोयमो कालगच्छवी ॥ ५ ॥

व्या—अथारिष्टनेमेर्वर्णनमाह—सोऽरिष्टनेमिनामा भगवानष्टसहस्रलक्षणधरो वर्तते, अष्टभिरधिकं सहस्रमष्टसहस्रं, लक्षणानामष्टसहस्रं लक्षणाष्टसहस्रं, तद्धरतीति लक्षणाष्टसहस्रधरः. अष्टसहस्रलक्षणानि धरतीति वाऽष्ट-

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सहस्रलक्षणधरः. पुनः कीदृशः ? लक्षणस्वरसंयुतः, लक्षणैः सहितः स्वरो लक्षणस्वरस्तेन संयुतः. स्वरस्यलक्षणानि माधुर्यलावण्याऽव्याहतगांभीर्यादीनि, तैः संयुतः. तीर्थंकरस्य हि अष्टाधिकसहस्रलक्षणानि शरीरे भवंति. स्वस्तिकवृषभसिंहश्रीवत्सशंखचक्रगजाश्वच्छत्राब्धिप्रमुखाणि लक्षणानि हस्तपादादौ भवंति. पुनः कीदृशोऽरिष्टनेमिः ? गौतमो गौतमगोत्रीयः, पुनः कीदृशः ? कालकच्छविः श्यामकांतिः. ॥ ५ ॥

अर्थः—हवे ए अरिष्टनेमि कुमारनुं वर्णन करे छे. ते अरिष्टनेमि नामना भगवान् अष्टसहस्रलक्षणधर हता, अर्थात् एक हजारने आठ लक्षणो धारण करनारा हता. वळी ते केवा हता ? लक्षण स्वर संयुत=लक्षण सहित स्वरवडें संयुत हता. अर्थात् माधुर्य, लावण्य, अव्याहतता, गांभीर्य; इत्यादिक स्वरनां जे लक्षणो तेणें करी संयुत हता. तीर्थंकरना शरीरमां एक हजारने आठ लक्षणो होय छे; जेवाके–स्वस्तिक, वृषभ, सिंह, श्रीवत्स, शंख, चक्र, गज, अश्व, छत्र, समुद्र; इत्यादि लक्षणो हाथ पग वगेरे शरीरावयवोमां होय छे. वळी ते अरिष्टनेमि केवा ? गौतम, अर्थात्–गौतमगोत्रीय तथा कालकच्छवि=श्याम देहकांतिवाळा हता. ॥ ५ ॥

मू०—वज्जरिसहसंघयणे । समचउरसो झसोयरो ॥ तस्स राइमईकन्नं । भज्जं जाचइ केसवो ॥ ६ ॥

व्य०—पुनः कीदृशः सः ? वज्रं कीलिका, ऋषभः पट्टः, नाराच उभयपार्श्वयोर्मर्कटबन्धः, एभिः संहननं शरीररचना यस्य स वज्रर्षभनाराचसंहननः. पुनः कीदृशः ? समचतुरस्रः प्रथमसंस्थानवान्, यः पद्मासने स्थितः सन् चतुःषु पार्श्वेषु सदृशशरीरप्रमाणो भवति, स, समचतुरस्रसंस्थानवानुच्यते. अथ तस्यारिष्टनेमिकुमारस्य केशवः कृष्णो राजीमतीं कन्या भार्यायै याचते. कृष्णदेवो राजीमत्या जनकपार्श्वे राजीमतीं कन्यां नेमिनाथस्य भार्यार्थं

For Private and Personal Use Only

याचते इति भावः. ॥ ६ ॥

अर्थः—पुनरपि ते केवा हता ते कहे छे वज्रर्षभनाराचसंहनन=वज्र=कीलिका, ऋषभ=पट्ट अने नाराच=बन्ने पार्श्वमां मर्कट बंध; आवा प्रकारनुं जेनुं संहनन=शरीररचना छे एवा, तथा समचतुरस्र=प्रथम संस्थानवान्=अर्थात् ज्यारे पद्मासने स्थित थाय त्यारें चारे पडखे अदश शरीरप्रमाण जणाय तेवा होय ते समचतुरस्र संस्थानवाळा कहेवाय छे. वळी ते झषोदर, एटले मत्स्यना समान उदरप्रदेशवाळा हाता. आवा ए अरिष्टनेमिकुमारने भार्या अर्थे केशव=कृष्णे राजीमती कन्यानी याचना करी. एटले श्रीकृष्णदेवें राजीमतीना पिता उग्रसेन पासें जइने राजीमती कन्याने नेमिनाथनी भार्या अर्थे याचना करी. ॥ ६ ॥

---

मू०—अह सा रायवरकन्ना । सुसीला चारुपेहिणी ॥ सव्वलक्खणसंपन्ना । विज्जुसोयामणिप्पभा ॥ ७ ॥

व्या०—अथानंतरं सा वरराजकन्या राजीमती कीदृशी वर्तते ? तद्वर्णनमाह—राजसु वरो राजवरः षोडशसहस्रमुकुटबद्धभूपेषु श्रेष्ठ उग्रसेनो राजा, तस्य कन्या पुत्री राजवरकन्या. सा कीदृशी ? सुशीला शोभनाचारा, पुनः कीदृशी ? चारुप्रेक्षणी, चारु प्रेक्षणमवलोकनं यस्याः सा चारुप्रेक्षणी सुंदरावलोकना, सुंदरनयना वा. पुनः कीदृशी ? सर्वलक्षणसंपन्ना, चतुःषष्टि कामिनीकलाकोविदा. पुनः कीदृशी ? विद्युत्सौदामिनीप्रभा, विशेषेण द्योतते इति विद्युत्, सा चासौ सौदामिनी च विद्युत्सौदामिनी, तद्वत्प्रभा यस्याः सा विद्युत्सौदामिनीप्रभा, स्फुरद्विद्युत्कांतिः.।७।

अर्थः—अथ=तदनंतर ते राजकन्या राजीमति केवी छे, तेनुं वर्णन करेछे—राजाओमां श्रेष्ठ=सोळ हजार मुकुटबद्ध राजाओमां श्रेष्ठ=उग्रसेन राजानी कन्या. वळीते केवी ? सुशीला= शोभन आचारवाळी तथा चारुप्रेक्षणी, अर्थात् सुंदरनेत्रवाळी तेमज सर्वलक्षणसंपन्ना=

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





चोसठ कामिनी कळामां निपुणा अने विद्युत्सौदामिनीप्रभा, एटले विशेषरीतें चमकती वीजळीनाजेवी जेनी देहकांति छे एवी. ॥७॥

मू०—अहाह जणओ तीसे। वासुदेवं महड्ढियं ॥ इहागच्छउ कुमारो। जा से कन्नं दलामहं ॥ ८ ॥

व्या—अथ कृष्णेन नेमिकुमारार्थं कन्याया याचनानंतरं तस्या राजीमत्या जनको महर्द्धिकं वासुदेवं कृष्णमाह, हे वासुदेव! कुमारोऽरिष्टनेमिरिहास्मद्गृहे आगच्छतु, 'जा' इति येन कारणेन 'से' इति तस्मै अरिष्टनेमिकुमाराय तां राजीमतीं कन्यामहं ददामि. आसन्नक्रोष्टुकिनैमित्तिकादिष्टे लग्ने विवाहविधिनोपढौकयामि. ॥८॥

अर्थः—ज्यारे कृष्णें नेमिकुमारने माटे कन्यानुं मागुं कर्युं ते पछी ते राजीमतीना जनक=पिता उग्रसेने महोटी ऋद्धिवाळा श्रीकृष्णने कह्युं के–'हे वासुदेव! ए अरिष्टनेमिकुमार अमारे घरे आवे एटले ते अरिष्टनेमिकुमारने ते राजीमती कन्या हुं आपुं. पासे बेठेला नैमित्तिक=ज्योतिर्विद् क्रौष्टुकिए निश्चित करी आपेल लग्न समये हुं विवाहविधिथी मारी कन्या तेने अर्पण करुं. ॥८॥

मू०—सव्वोसहीहिं ण्हविओ। कयकोउअमंगलो ॥ दिव्वजुअलं परिहिओ। आहरणेहिंविभूसिओ ॥ ९ ॥

व्या०—अथारिष्टनेमिकुमारः क्रोष्टुकयर्पितलग्ने सर्वाभिरौषधीभिः, जयाविजयाशल्यविशल्याऋद्धिवृद्ध्यादिभिः स्नपितः, पुनः कृतकौतुकमंगलः, पुनः कीदृशः? परिधृतदिव्ययुगलः, परिहितं दिव्यं विवाहप्रस्तावोचितं वस्त्रयुगलं येन स परिहितदिव्ययुगलः, प्राकृतत्वाच्छन्दविपर्ययः. पुनः. कीदृशः? आभरणैः कुंडलमुकुटहारादिभिर्विभूषितोऽलंकृतः ॥ ९ ॥

अर्थः—पछी ए अरिष्टनेमिकुमारने क्रोष्टुकिए आपेला लग्नें सर्वौषधि=जया विजया शल्यविशल्या ऋद्धि वृद्धि आदिक औषधि=

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





वडे नवरावीने तेमज कौतुकमंगळ=रक्षाबंधनादिक करीने, तथा दिव्यवस्त्रयुगल पहेरावीने तेने विवाहोचित कुंडळ, मुकुट, हार, कडां, वगेरे आभूषणोथी शणगारीये, ॥ ९. ॥

मू०—मत्तं च गंधहत्थिं च । वासुदेवस्स जिट्ठगं । आरूढो सोहई अहियं । सिरे चूडामणि जहा ॥ १० ॥

व्या०—च पुनररिष्टनेमिकुमारो वासुदेवस्य ज्येष्ठकं मत्तं गंधहस्तिनमारूढोऽधिकं शोभते. क इव ? शिरसि मस्तके चूडामणिरिव, यथा मस्तके मुकुटः शोभते, तथा नेमिः सर्वेषां यादवानां मध्ये चूडामणिसदृशो विराजते.

अर्थः—पछी ए अरिष्टनेमिकुमार, वासुदेवना ज्येष्टक=महोटामत्तगंधहस्ती उपर आरुढ थइ जेम मस्तक उपर मुकुट शोमे तेम शोभशे, सर्वयादवोना मध्ये चूडामणि समान दीपी नीकळशे. ॥ १० ॥

मू०—अह उस्सिएण छत्तेण । चामराहियसोहिओ ॥ दसारचक्केण य सो । सव्वओ परिवारिओ ॥ ११ ॥

मू०—चउरंगिणीए सेणाए । रइयाए जहक्कमं ॥ तुडीयाण सन्निनाएण । दिव्वेणं गयणं फुसा ॥ १२ ॥

मू०—एयारिसीए इड्ढीए । जुत्तिए उत्तमाइय ॥ नियगाओ भवणाओ । णिज्जाओ वण्हिपुङ्गवो ॥ १३ ॥

तिसृभिः कुलकं ॥ व्या०—अथानंतरं वृष्णिपुङ्गवो नेमिकुमारो निजकान्द्भवनात्स्वकीयगृहादेताहृश्या समीपतरवर्तिन्या ऋध्ध्या, पुनरुत्तमया प्रधानया युत्या दीप्त्या पाणिग्रहणाय निर्गतः, उग्रसेनगृहंप्रति स्वमंदिरान्निःसृत इत्यर्थः, कीदृश्या ऋध्ध्या ? तां ऋद्धिपद्धतिमाह—स नेमिकुमार उच्छ्रितेनोच्चैः कृतेन छत्रेण मेघाडंबरछत्रेण, च पुनश्चामराभ्यपार्श्वयोर्वीज्यमानः शोभितः, पुनः स नेमिकुमारो दशार्हचक्रेण यादवसमूहेन सर्वतः परिवृतः. ॥ ११ ॥

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पुनः कीदृशः ? चतुरंगिण्या सेनया परिवृतः, पुनः कीदृशः ? त्रुटितानां तूर्याणां भेरिमृदंगपटहकरतलतालादीनां दिव्येन देवयोग्येन सन्निनादेन सम्यक्शब्देन सहितः. कीदृशेन तूर्याणां निनादेन ? गगनस्पृशा, गगनं स्पृशतीति गगनस्पृक्, तेनाकाशव्यापिना. ॥ १३ ॥

अर्थः—त्रण गाथाओनुं कुलक=एटले एक वाक्य छे. तदनंतर वृष्णिपुंगव=वृष्णिकुळमां श्रेष्ठ=नेमिकुमार मोताना भुवनथी आवी=वर्णवाशे तेवी=ऋधिथी तथा उत्तम दीप्तिथी पाणिग्रहण करवा नीकल्या, उग्रसेनना घर प्रति जवा माटे पोताने घरेथी नीकल्या. केवी ऋद्धि ? ते ऋद्धिनी पद्धतिनुं वर्णन आपेछे=उच्छ्रित=उपर धरेल छत्र=मेघाडंबर छत्र सहित, तथा बेय पडखे बे चमारो वडें व्यंजन करावाथी शोभता, वळी दशार्हचक्र=यादव समुदाये सर्वतः परिवारित, तथा क्रमप्रमाणे रचेली=गोठवेली चतुरंगिणी सेनाये परिवृत, ते साथे तूर्य=विविधवाद्योना गगनस्पर्शी=आकाशव्यापी संनिनाद=मनोहर नाद थता आवे. ( एवी ऋद्धिथी परणवानीकल्या. ) ॥ ११-१२-१३. ॥

---

मू०—अह सो तत्थ निज्जंते । दिस्स पाणे भयदुुए ॥ वाडेहिं पंजरेहिं च । संनिरुद्धे सुदुक्खिए ॥ १४ ॥

मू०—जीवियंतं तु संपत्ते । मंसट्ठा भक्खियव्वए ॥ पासित्ता से महापन्ने । सारहिं इणमब्बवी ॥ १५ ॥

युग्मं ॥ व्या०—अथानंतरं स नेमिकुमारः सारथिमिदमब्रवीत्, किं कृत्वा ? तत्र विवाहमंडपासन्ने निर्यन्नधिगच्छन् भयद्रुतान् भयव्याकुलान् प्राणान् जीवान् स्थलचरान् मृगशशकशुकरतित्तिरलावकादीन् मांसार्थं भक्षितव्यान् 'पासित्ता' इति विचार्य दृष्ट्वा तादृशान् हृदि निधाय, कथंभूतान् प्राणान् ? वाटकैर्भित्तिभिः कंटकवाटि-

For Private and Personal Use Only

कादिभिर्वा निरुद्धानतिशयेन यंत्रितान्, पुनः पंजरैर्लोहवंशशलाकादिविनिर्मितैः पक्षिनियंत्रणस्थानैः संस्थानैः संनिरुद्धान्, अत एव सुदुःखितान्, पुनः कीदृशान्? जीवितांतं संप्राप्तान्, ते प्राणिन एवं जानंत्यस्माकं मरणमागतं, कुतोऽस्माकं जीवितमिति मरणदशां संप्राप्तान्. कीदृशो नेमिकुमारः? महाप्राज्ञो महाबुद्धिसहितः, अर्थाद् ज्ञानत्रयेण विस्तीर्णबुद्धिरित्यर्थः. ॥ १५ ॥

बे गाथानो संबंध भेळो छे. अर्थः—अथ=ते पछी ते नेमिकुमार सारथिने आम बोल्या. केम करीने? त्यां विवाहमंडप पांसे पहोंच्या ते वख्ते भयथी व्याकुळ प्राणीओ=मृग, शशलां सूकर, तित्तिरि, लावक आदिक स्थल चारी तथा पक्षीओ=ने मांस भक्षणार्थे वाडामां तथा पांजराओमां निरुद्ध=पूरेलां अने तेथीज अतिदुःखित थतां, जीवितांतने संप्राप्त=अर्थात् मुवाजेवां थइ गयेलां जोइने ए महाप्राज्ञ=ज्ञानत्रयथी विस्तीर्णबुद्धिमान् नेमिकुमारे सारथिने पुछ्युं. ॥ १४-१५ ॥

मू०—कस्स अट्ठा इमे पाणा। एते सव्वे सुहेसिणो ॥ वाडेहिं पंजरेहिं च। संनिरुद्धा य अच्छिहि ॥ १६ ॥

व्या—सारथिं किमब्रवीदित्याह—हे सारथे! इमे प्रत्यक्षं दृश्यमानाः सर्वे प्राणा वाटकैश्च पुनः पंजरैः संनिरुद्धा अत्यंतं नियंत्रिताः कस्यार्थं कस्य हेतोः? 'अच्छिहिं' इति तिष्ठंति. कीदृशा इमे प्राणाः? सुखार्थिनः, सर्वे संसारिणो जीवाः सुखार्थिनः संति, किमर्थं दुःखिनः क्रियंते? भगवान् जानन्नपि जीवदयाप्रकटीकरणार्थं सारथिं पप्रच्छेति भावः. ॥ १६ ॥

अर्थः—सारथिने शुं कह्युं? ते कहे छे–हे सारथे! आ प्रत्यक्ष देखाता प्राणियो जे वाडाओमां तथा पांजराओमां संनिरुद्ध=

रूंधेला=पूरेला छे ते कोने माटे ? शा हेतुथी एम रहेला छे ? आ प्राणी केवा छे ? सुखार्थी, संसारमां सर्वे प्राणी सुखना अर्थीज होय छे तो पछी आ प्राणी शा माटे दुःखी कराय छे ? भगवन् पोते जाणे छे तथापि जीवदया प्रकट करवा सारथिने पूछे छे. ॥ १६ ॥

मू०—अह सरही तओ भणइ । एए भद्दा उ पाणिणो ॥तुज्झं विवाहकज्जंमि । भोयावेउं बहुं जणं ॥ १७ ॥

व्या—अथ नेमिकुमारवाक्यश्रवणानंतरं ततः सारथिर्भणति, हे स्वामिन्नेते भद्राः प्राणिनो युष्माकं विवाहकार्ये बहुजनान् यादवलोकान् भोजयितुमेकत्र मेलिताः संति. ॥ १७ ॥

अर्थः—अथ=नेमिकुमारनुं वाक्य सांभळीने तदनंतर सारथि बोल्यो के-हे स्वामिन् ! आ बिचारा भोळा प्राणियो आपना विवाहकार्यमां घणाकजनो—यादवलोकोने भोजन कराववा माटे अहीं एकत्र भेळाकरी राखेला छे. ॥ १७ ॥

मू०—सोऊण तस्स वयणं । बहुपाणिविणासणं ॥ चिंतेइ से महापन्ने । साणुक्कोसे जिए हिओ ॥ १८ ॥

व्या०—से इति स नेमिकुमारस्तस्य सारथेर्वचनं श्रुत्वा चिंतयति. कीदृशः सः ? महाप्राज्ञो महाबुद्धिमान्, पुनः कीदृशः सः ? जीवे हितो जीवविषये हितेप्सुः. पुनः कीदृशः ? सानुक्रोशः, सह अनुक्रोशेन वर्तते इति सानुक्रोशः सदयः, अथवा जीवे हि निश्चयेन सानुक्रोशः सकरुणः, तु शब्दः पादपूरणे. कीदृशं सारथेर्वचनं ? बहुप्राणिविनाशनं बहुजीवानां विघातकारकं. ॥ १८ ॥

अर्थः—ते नेमिकुमार ते सारथिनुं वचन सांभळीने चिंतामां पड्या ते केवा ? महाप्राज्ञ=महाबुद्धिमान् तथा जीवोनां हितकर अने सानुक्रोश=दयाळु अथवा हि=निश्चये जीवने विषये सानुक्रोश=सदय. 'तु' शब्द पादपूरणार्थ गणाय. सारथिनुं वचन केवुं ?

बहुप्राणिविनाशन=घणां प्राणिओनुं घातकारक. ॥ १८ ॥

मू०—जइ मज्झकारणा एए । हम्मंते सुबहुजिया ॥ न मे एयं तु निस्सेसं । परलोए भविस्सइ ॥ १९ ॥

व्या०—तदा नेमिकुमारः किं चिंतयतीत्याह—यदि मम विवाहादिकारणेनैते सुबहवः प्रचुरा जीवा हनिष्यंते मारयिष्यंते, तदैतद्हिंसाख्यं कर्म परलोके परभवे निःश्रेयसं कल्याणकारि न भविष्यति परलोकभीरुत्वस्यात्यंतमभ्यस्ततयैवाभिधानं, अन्यथा भगवतश्चरमदेहत्वादतिशयज्ञानत्वाच्च कुत एवंविधा चिंतेत भावः. ॥ १९ ॥

अर्थः—त्यारे नेमिकुमारे शुं विचार्युं ते कहेछे—जो मारा विवाहने कारणे आ बहु=पुष्कळ जीवो हणायछे=मरायछे तो आ हिंसात्मक कर्म मने परलोकमां=परभवे निःश्रेयस=कल्याणकारक थशे नहिं. अत्यंत अभ्यस्त होवाथी पोतानी परलोकथी भीरुता कही नाखी. अन्यथा भगवान्नो आ छेल्लो देह होवाथी तथा अतिशय ज्ञान होवाथी आवा प्रकारनी चिंता होयज क्यांथी? एवो भावार्थ छे. ॥१९॥

मू०—सो कुंडलाण जुअलं । सुत्तगं च महाजसो ॥ आभरणाणि य सव्वाणि । सारहिस्स पणामए ॥ २० ॥

व्या०—स नेमिकुमारो महायशाः, नेमिनाथस्याभिप्रायात् सर्वेषु जीवेषु बंधनेभ्यो मुक्तेषु सत्सु सर्वाण्याभरणानि सारथये प्रणामयति ददाति. कानि तान्याभरणानि? कुंडलानां युगलं, पुनः सूत्रकं कटीदवरकं, चकारादाभरणशब्देन हारादीनि सर्वांगोपांगभूषणानि सारथेर्ददौ. ॥ २० ॥

अर्थ—महायशाः महोटा यशवाळा ते नेमिकुमारे—ज्यारे नेमिनाथनो अभिप्राय जाणी बधां प्राणियो बंधनथी छोडी मूक्यां त्यारे=कुंडळनुं युगळ जोडी, सूत्रक=कंदोरो, 'च' शब्द उपरथी बीजां कडां बाजुबंध हार वगेरे सर्व अंग उपांगना आभारणो उतारीने

For Private and Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir





सारथिने अर्प्यां-प्रीतिदान=इनाम तरीके आपी दीधां. ॥ २० ॥

मू०—मणपरिणामे य कए। देवा य जहोइयं समोइण्णा॥ सव्वड्ढीए सपरिसा। निक्खमणं तस्स काउं जे ॥२१॥

व्या—तस्मिन्नेमिकुमारे मनःपरिणामे चित्ताभिप्राये दीक्षां प्रतिकृते सति, लोकांतिकदेववचनात्सांवत्सरिकदाने दत्ते सति, देवाश्चतुर्विधा यथोचितं यथायोग्यं सर्वर्द्ध्यां समवतीर्णास्तत्रागताः. किं कर्तुं? तस्य भगवतो नेमिकुमारस्य निःक्रमणमहोत्सवं दीक्षामहिमानं कर्तुं जेशब्दः पादपूरणे. कीदृशा देवाः? सपरिषदः, सह तिसृभिः परिषद्भिर्वर्तंते इति सपरिषदः परीषत्सहिता इत्यर्थः. ॥ २१ ॥

अर्थः—ते नेमिकुमारे पोतानो मनः परिणाम=चित्तनो अभिप्राय=दीक्षा प्रति कर्यो त्यारे, एटले लोकांतिक देवोना वचनथी सांवत्सरिक दान देवायां ते समये चतुर्विध देवो, यथोचित रीतें ते भगवान् नेमिकुमारनो निष्क्रमण महोत्सव=एटले-दीक्षानो महिमा-करवा माटे त्रणे परिषद् सहित तथा सर्व प्रकारनी ऋद्धि सहित समवतीर्ण थया=स्वर्गथी उतर्या. ॥ २१ ॥

मू०—देवमणुस्सपरिवुडो। सिबियारयणं तओ समारूढो॥ निक्खमिय बारगाओ। रेवययंमि ठिओ भगव ॥२२॥

व्या०—ततोऽनंतरं नेमिकुमारो भगवान् ज्ञानवान् दीक्षावसरज्ञो देवैर्मनुष्यैः परिवृतो देवमनुष्यपरिवृतः शिबिकारत्नमुत्तरकुरुनामकं समारूढो द्वारिकापुरितो निःक्रम्य निःसृत्य रेवते रैवताचले स्थितः. ॥ २२ ॥

